जगद्गुरुश्रीत्रिदण्डिग्रन्थमालाया श्रीरामानन्द-
वेदान्तविषयकं प्रथमं पुष्पम् ।

प्रस्थानत्रयान्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्याय नम.

श्रीरामानन्दपीठनामकश्रीअनुभवानन्दद्वारपाठसस्थापकाचार्य-

जगद्गुरुश्रीअनुभवानन्दाचार्यप्रणीतः

श्रौतार्थसंग्रहः



सशोधक·—
महामहोपाध्याय स्वामी श्री रघुवराचार्य वेदान्तकेसरी
श्रीरामानन्दपीठ (शेषमठ शोंगडा)

जगद्गुरुश्रीमदनुभवानन्दाचार्याष्टकम्

रक्षकं वैष्णवानां च धर्मवारिधिवर्धकम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥१॥

रामानन्दकृतानन्दभाष्याब्जस्य प्रभाकरम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥२॥

भक्तिगङ्गाप्रवाहेण मुक्तिदं लोकपावनम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥३॥

विशिष्टाद्वैतवादेन वादिवादापसारकम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥४॥

सर्वसिद्धिप्रदातारं सिद्धेन्द्रं सिद्धसेवितम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥५॥

मुद्रोर्ध्वपुंड्रमालादे रक्षकं परमं बुधम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥६॥

श्रीगीतार्थसुधाकारं सदाचारोपदेशकम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥७॥

त्रयाणां च रहस्यानां भव्यव्याख्याविधायिनम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥८॥

वैष्णवभाष्यकारश्रीवैष्णवाचार्यनिर्मितम् ।
अष्टकं भवतादेतत् सर्वकल्याणकारकम् ॥९॥

श्रीसीतारामाभ्यां नमः ।
आनन्दभाष्यकारश्रीरामानन्दाचार्याय नमः ।
श्रीअनुभवानन्दद्वारपीठसंस्थापकजगद्गुरु
श्रीअनुभवनन्दाचार्यप्रणीतः

श्रौतार्थसंग्रहः

वन्दे सीतापतिं सीतां मारुतिं च महामतिम् ।
आनन्दभाष्यकृद्रामानन्दाचार्यं यतीश्वरम् ॥१॥
नत्वाऽहं स्वगुरुं भावानन्दाचार्यं जगद्गुरुम् ।
श्रौततत्त्वावबोधाय कुर्वे श्रौतार्थसंग्रहम् ॥२॥

"सर्वे वेदा यत्पदमामनन्ति" इति "रामपदेनासौ परब्रह्माभिधीयते" इत्यादिश्रुतिप्रामाण्यात् परब्रह्मपदाभिधेयः सर्वेश्वरः श्रीराम एव मुख्यं श्रौतं तत्त्वम् । मोक्षावाप्त्यर्थं तज्ज्ञानमेव मुमुक्षुभिः सम्पादनीयं "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यादिश्रुतिप्रामाण्यात् । स च भगवान्श्रीरामः सर्वदा चिदचिद्विशिष्ट एवावतेष्ठते । तथा चाहुराचार्यसार्वभौमाः श्रीराघवानन्दाचार्याः श्रीराघवेन्द्रमङ्गलमालायाम्—

'चिदचिद्भ्यां विशिष्टाय शिष्टपक्षसुरक्षिणे ।
सच्चिदानन्दरूपाय राघवेन्द्राय मङ्गलम् ॥१॥ इति

वेदान्तरहस्यमार्त्तण्डभाष्येष्युक्तम्—

"बोधायनवृत्तिकारभगवत्पुरुषोत्तमाचार्यबोधायनप्रशिष्यैराचार्यचक्रचूडामणिभिः श्रीसदानन्दाचार्यैरप्युक्तं, वेदान्तसारस्तवे—

"चिताऽचिता विशिष्टाय सूक्ष्मयाऽसूक्ष्मयाथ च ।
कारणकार्यरूपाय श्रीरामाय नमो नम ॥" इति ॥"

चिदचितोः श्रीरामस्य विशेषणत्वं तु "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृत." "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः" इत्यादिश्रुतिनिचयप्रतिपाद्यतच्छरीरत्वादेव । निगदितं चैतदुपेयोपायदर्पणे जगद्गुरुभिः श्रीश्रुतानन्दाचार्यैः—"ऽशस्य देहरूपत्वात् प्रकारौ कथितावुभौ । उभाभ्यां च विशिष्टो हि सर्वेशो रघुनायकः ॥" इति । सिद्धान्तविजयिभिः श्रीश्रियानन्दाचार्यैरप्युदितं—"प्रमिताक्षरासारे—तनुत्वेन श्रुतो जीवो ब्रह्मणो हि विशेषणम्" (प्र. सा. २।३।२२) "तनुत्वात् तत् प्रकारत्वेनाचितो ब्रह्मणोंऽशता" (प्र. ३।२।२) इति । भगवद्रामानन्दाचार्य आचार्यसार्वभौमोऽप्याह—"चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्मैव सर्वदा सर्वशब्दाभिधेयम् ।" (आनन्दभाष्य २।१।१४)

शरीरं तु चेतनं प्रत्याधेयं विधेयं शेषभूतं चापृथक्सिद्धं द्रव्यम् । तथा हि—भाष्यम्—"प्राणशरीरः"—सर्वेषां प्राणानां धारकः "यस्य प्राणः शरीरम्" इति श्रुत्या प्राणस्य शरीरत्वनिर्देशादाधेयत्वविधेयत्वाङ्गत्वादयः फलन्ति । लोकेऽपि शरीरपदेनाधेयत्वादय एव गृह्यन्त इति तान्येव शरीरपदबोध्यानीति ।" (आनन्दभाष्य १।२।२) इति ।

एतेन चिदचिदीश्वरश्चेति त्रय एव श्रौताः पदार्था इत्युक्तं भवति । तथा हि श्रुतिः—"क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एक." इति । उक्तं च सदाचार्यसुरेन्द्रैः श्रीराघवानन्दाचार्यैः श्रौततत्त्वसमुच्चये—'भोक्ता भोग्यं प्रेरितारं च मत्त्वे" त्यादिश्रुतिप्रामाण्याच्चिदचिदीश्वरश्चेति त्रीण्येव श्रौतानि तत्त्वानीति ।" इति ।

१—अथ चिद्रूपार्थनिरूपणम्

तत्र चित्पदवाच्यो जीवः । स चाणुचेतनो विशेषणानुक्तावीश्वरे विशेष्यानुक्तौ प्रकृतिकार्येऽतिव्याप्तिरत उभयोपादानम् । चेतनो नाम ज्ञानाश्रयो जानामीतिप्रतीते 'बोद्धा कर्त्ते' तिश्रुतेश्च ।

"एष द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः" (प्रश्न०५।९) इतिश्रुतिप्रण्याज्ज्ञानाश्रयोऽपि जीवः । सिद्धान्ते ज्ञानरूपतयाऽङ्गीकृतोऽत्र एव स ईश्वरवत् प्रत्यक्पदवाच्यः । यः स्वस्मै स्वयमेव प्रकाशते स प्रत्यक् । एवकारेण नित्यविभूतिधर्मभूतज्ञानयोर्व्यावृत्तिः । जीवस्य स्वरूपभूत ज्ञानं धर्मिभूतज्ञानत्वेन तदाश्रितं तदगुणभूतं च ज्ञानं धर्मभूतज्ञानत्वेनाभिधीयते "सुखमहमस्वाप्समि" तिप्रतीत्या. जीवः स्वयम्प्रकाशो ज्ञानत्वाद् धर्मभूतज्ञानवदित्यनुमानाच्च जीवे स्वप्रकाशत्वसिद्धिः ।

जीवात्मनो नित्यत्वम् ।

स च जीवो नित्य. "न जायते म्रियते वा विपश्चित्" "नित्यो नित्यानां चेतनश्चेतनानामि" त्यादिश्रुतेः । जीवस्य जन्ममरणावस्थाऽवाप्तिशङ्का तु देहसंयोगवियोगावादाय समाधेया । जीवस्यानित्यत्वे तु कृतविप्रणाशाकृताभ्युपगमौ दोषौ भवेतामिति नित्यत्वमेवाभ्युपगन्तव्यं तस्य ।

"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि"ति श्रुतिविरोधस्तु न शङ्कनीय, सिद्धान्ते सृष्टे प्राङ् नामरूपविभागानर्हचिदचिद्विशिष्टस्यैकस्य ब्रह्मण स्वीकारात्। अत उक्तमेतच्छ्रुतेरानन्दभाष्ये भगवद्भि श्रीरामानन्दाचार्यै —"यद्यप्यय सच्छब्दो विशेष्यलक्षणपरमात्मबोधकस्तथापि कारणविषयत्वसामर्थ्यात् कारणताप्रयोजकगुणविशिष्टप्रकृतिपुरुषकालशरीरक परमात्मानमेव समुपस्थापयति।" (छादोग्यानन्दभाष्य ६। २।१) इति। इद प्रत्यक्षादिप्रमाणेन परिदृश्यमानं जगद् विभक्तनामरूप बहुत्वावस्थ सृष्टे पूर्वं निमितान्तररहितमविभक्तनामरूपतया एक सच्छब्दशब्दित ब्रह्मलक्षणमेवाभवदिति।" (छान्दोग्यान दभाष्य ६।२।१) इति च।

जीवात्मनोऽणुत्वम्

"एषोऽणुरात्मा चेतसा वेदितव्य" "बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीव स विज्ञेय स चानन्त्याय कल्पते॥" आराग्रमात्रो ह्यवरोऽपि दृष्ट।" इत्यादिश्रुतिप्रामाण्यादणुपरिमाणोऽय जीवात्मा।

स्थूलदेहमपहाय सूक्ष्मदेहोपादानकाल सकलस्यावकाशाभावात् स्वरूपशैथिल्यप्रसङ्गाद्धेय एव सर्वथा जीवमध्यमपरिमाणवाद। ननु सङ्कोचविकाशावङ्गीकृत्य स्थूलसूक्ष्मजीवाना क्रमात् सूक्ष्मस्थूलदेहप्रवेशस्योपपन्नत्वेन समीचीन एव जीवमध्यमपरिणामवाद इति चेन्न, तथात्वे जीवाना सावयवत्वेनानित्यवापत्ते।

ननु शरीरव्यापिसुखदुःखाद्युपलम्भये सुदूरदेशेऽपि जीवादृष्टप्रयुक्त जीवभोग्यपदार्थोत्पत्तये जीवविभुत्वमेवाङ्गीकर्त्तव्यमिति चेन्न, तथात्वे

जीवोत्क्रान्त्यादिप्रतिपादकश्रुतिव्याकोपप्रसङ्गात्। तथा चाहुर्ब्रह्मसूत्रकारा भगवन्तो बादरायणाः–'उत्क्रान्तिगत्यागतीनाम्' (ब्र०सू० २।३।२१) व्याख्यातञ्चैतत् पारमार्षं सूत्रञ्चैवमेवानन्दभाष्यकारैर्भगवद्भिः श्रीरामानन्दाचार्यैः श्रीसम्प्रदायप्रधानाचार्यैः स्वभाष्ये। तथा हि– "आत्मनः सर्वगतत्वं निराकरोति" उत्क्रान्तीत्यादिना। ताभ्य इत्यनुवर्त्तते। नायमात्मा सर्वगतः किन्त्वणुरेव। उत्क्रान्तिगत्यागतीनाम्। आत्मोत्क्रान्तितद्गतितया गतिश्रुतिभ्य इत्यर्थः। "तेन प्रद्योतेनैष आत्मा निष्क्रामति" (बृ.६।४।२) "ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" (कौषीतकी १।२) "तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे" (ब.६।४।२) इत्यादिगत्यागत्युत्क्रान्तिश्रुतिभ्य आत्मनः सर्वगतत्वं नोपपद्यते किन्त्वणुत्वमेव। सर्वगतस्य विभोर्गतिश्चागतिश्च नोपपद्यते। तस्मादात्मनोऽणुत्वमेव।" (आनन्दभाष्य २।३।२१)इति।

घटोपाधिकाकाशवच्छ्रुत्यननुमतस्यान्तःकरणोपाधिकचैतन्यात्मकजीवस्य गत्यादिस्वीकारे तु "अथैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इत्यादि श्रुतिविरोधोऽनिवार्य एव। तस्मादणुपरिमाण एव जीवः।

गृहकोणस्थितस्यापि दीपस्य स्वप्रभया गृहस्य सर्वप्रदेशे व्याप्तिरिवाणुपरिमाणकस्यापि जीवस्य स्वधर्मभूतज्ञानद्वारा देहस्य सर्वप्रदेशे व्याप्तिरस्त्यतो न काचिदनुपपत्तिः शरीरव्यापिसुखाद्युपलम्भो। एवं जीवादृष्टमपि सर्वव्यापीश्वरेच्छाऽनर्यान्तरमेव। अत एवोक्तमाचार्य-

सार्वभौमैः श्रीद्वारानन्दाचार्यैः—'दैवाभिधास्ति जीवाना पूर्वकर्मफलप्रदा । यस्येच्छा सदसद्रूपा रामचंद्रं नमामि तम् ॥" (श्रीरामचन्द्रदशकम्) इति । अतो दूरदेशेऽपि अदृष्टप्रयुक्ततत्तज्जीवभोग्यपदार्थोत्पत्तिरप्यनुपपत्तिशून्यैवेति ध्येयम् ।

कर्तृत्वम्

"एष द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः" (प्रश्नोपनिषद ५।६) इति श्रुत्या बोद्धेत्येवंरूपेण ज्ञानाश्रयत्ववत् कर्त्तेत्येवंरूपेण कर्तृत्वाश्रयत्वमपि प्रतिपादितं जीवात्मनोऽतस्तस्याकर्तृत्वापादनं श्रुतिविरुद्धमेव । अत एवोक्त जगद्गुरुभिः श्रीचिदानन्दाचार्यैश्चिदात्मप्रबोधे—'अकर्त्ता विभुर्नाथवा मध्यमानो न वा ज्ञानशून्यो जड़ो दु स्वरूपः । अणुर्ब्रह्मणोंऽशः शरीरं च शेष परं रामचन्द्रस्य दासश्चिदात्मा ।'। इति ।

सूत्रित च ब्रह्मसूत्रकारैर्भगवद्भिर्बादरायणै—'कर्त्ता शास्त्रार्थवत्वात्' (ब्र.सू.२।३।३४) इति । व्याख्यातं चैतत् प्रमिताक्षरावृत्याख्ये श्रीबोधायनवृत्तिसारे जगद्गुरुभिः श्रीदेवानन्दाचार्यैः । तथा हि —"आत्मा कर्त्ता" । न तु प्रकृतिः । 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादिशास्त्राणामप्रवृत्तस्य पुरुषस्य प्रवर्त्तकबोधोत्पादनद्वारा प्रवृत्युत्पादनेनार्थवत्वात् । अन्त करणस्य प्रवर्त्यत्वस्वीकारे तु तस्याचेतनत्वेन प्रवर्त्तकबोधोत्पादनासम्भवाच्छास्त्रवैफल्यमनिवार्यमेव ।" (बोधायनवृत्तिसार) इति ।

जीवकर्तृत्वं च न जीवायत्तं किन्तु परमात्माऽऽयत्तमेव । ऊचुश्च 'परात्तु तच्छ्रुते' रित्येतत्सूत्रमाश्य आनन्दमाष्यकारा आचार्य-

सार्वभौमा भगवन्तः श्रीरामानन्दाचार्या.—"तु शब्दः पूर्वपक्षव्यावृत्त्यर्थः। तज्जीवस्य कर्तृत्वं पराज्जीवान्तर्यामिण परमात्मन एव भवति। कुतः? तच्छ्रुतेः। 'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा" (तै०-आ० ३।११।१०) 'य आत्मानमन्तरो यमयति" (बृ० ३।७।२२) "एष ह्येवैनं साधुकर्म कारयति तं यमन्वानुनेषत्येष एवैनमसाधु कर्म कारयति तं यमेभ्यो लोकेभ्यो नुनुत्सते" (कौषी० ३।९) इति तस्य जीवकर्तृत्वस्य परमायत्तत्वश्रुतेः। तस्माज्जीवकर्तृत्वं परमपुरुषायत्तमेव। (आनन्दभाष्य २।३।४१) इति।

कर्तृत्वप्रतिपादनाद् भोक्तृत्वमपि प्रतिपादितं भवति जीवानाम्।

देहादिभ्यो वैलक्षण्यम्

जीवश्च न देहेन्द्रियप्राणबुद्धिस्वरूप 'मम देहः' 'मम चक्षुरादीनीन्द्रियाणि' 'मम प्राणाः' 'मम बुद्धि' रचेत्यादिप्रतीतेः। ऊचुश्च श्रौततत्त्वसमुच्चये भगवन्तः श्रीराघवानन्दाचार्याः—"स च 'यस्यात्मा शरीरमि' तिश्रुतिप्रामाण्यादीश्वरशरीररूपोऽपि न पाञ्चभौतिकस्वशरीररूपोऽहमित्युपलभ्यमानत्वात्, "मम पाञ्चभौतिकं शरीरम्' इति शरीरात् पृथक्त्वेनोपलभ्यमानत्वात् "न जायते म्रियते वा विपश्चित्" "नित्यो नित्याना चेतनश्चेतनानाम्" इत्यादिश्रुतिभिर्नित्यत्वेन प्रतिपादितत्वाच्च। इन्द्रियप्राणबुद्धिवैलक्षण्यमप्यनयैव रीत्या बोध्यम्। अत एवोक्तं जगद्गुरुश्रीश्रुतानन्दाचार्यैः—

"मुखाद्यापुचिजज्ञातृरूपोऽस्ति जीवः
परब्रह्मणोंशस्तनुर्नित्यशेषः।

न देहेन्द्रियप्राणबुद्धिस्वरूपो
विकारी जडो ब्रह्मरूपोऽपि नैव" ॥इति॥

उक्तञ्च बोधायनमतादर्शाख्यायां सहस्रश्लोक्यां जगद्गुरुश्रीश्रुतानन्दाचार्यप्रशिष्यैर्जगद्गुरुश्रीपूर्णानन्दाचार्यैः सिद्धान्तसार्वभौमैः —

"स्थूलश्चाहं हि गच्छामि" प्रत्ययाच्चेतनस्तनुः ।
मृते देहे तु चैतन्यं प्राणनिर्गमनान्न हि ॥ ८७७ ॥

इति चेन्न वरं चैतद्, विकल्पासहता यतः ।
देहस्यावयवे तच्चैकस्मिन् सर्वेषु वाऽस्ति हि ॥ ८७८ ॥
नाद्यः प्रतीयते यस्माच्चैतन्यमितरत्र च ।
बहुचेतनवत्त्वं स्यादन्त्ये चैकतनावथ ॥ ८७९ ॥
उच्छेदो व्यवहारस्य वैमत्यं तु मिथो भवेत् ।
हस्ताद्यन्यतमोच्छेदे स्मृतेश्चानुपपन्नता ॥ ८८० ॥
संघातरूपवत्त्वान्न त्वात्मा तनुर्यथा घटः ।
देहस्यानात्मता सिद्धा चेत्येवमनुमानतः ॥ ८८१ ॥
"मम देहः" प्रतीतेश्च नात्मता मन्यते तनोः ।
अनित्यत्वाज्जडत्वाच्च शरीरस्यात्मता न हि ॥ ८८२ ॥

इन्द्रियस्य न चात्मत्वं "ममेन्द्रियं" प्रतीतितः ।
जीवत्वं न च नेत्रादेस्तच्छून्ये जीव्यते यतः ॥ ८८३ ॥

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।"
भोगोपकरणं चैतं तस्मादात्मा मनो न हि ॥ ८८४ ॥

"मम प्राणः" प्रतितेश्च प्राणस्य चात्मता न हि ।
"प्राणोऽस्मी"तिश्रुतौ चोक्तः प्राणदेही परेश्वरः ॥ ८८५ ॥
"अहं जानामि" चेत्यत्राहमर्थस्यात्मता खलु ।
तस्य धर्मतया ज्ञाने ज्ञाते सा न कथञ्चन ॥ ८८६ ॥ इति ।

जीवाश्च "ममैवांशो जीवलोके जीवभूतः सनातनः" इति भगवद्वचनप्रामाण्याद् विशिष्टस्य विशेषणवद् ब्रह्मणोंशभूताः ।

जीवानां मिथो भेदः

अनन्ताः परस्परभिन्नाश्च जीवाः । अन्यथा 'नित्यो नित्यानाम्' 'न त्वेवाहं जातु नास न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परम् ।' इत्यादिश्रुतिस्मृतिव्याकोपः प्रसज्येत । जीवानामैक्य एकः मुख्यपरो दुःखी केचिद् बद्धा केचिच्च मुक्ता इत्यादिव्यवस्था च न स्याद् अत एवोक्तमानन्दभाष्यकारैर्भगवद्भिः श्रीरामानन्दाचार्यैतिसार्वभौमैर्गीताभाष्ये—

"किञ्चात्मनां भेदाभावे गुरुशिष्यव्यवस्थाभङ्गोऽपि स्यात् । एवं शिष्यतया कञ्चन शिक्षणीयमुपलभ्यानुपलभ्यतया वोपदिशत्याचार्यः ? आद्ये स्वस्माद् भिन्नमभिन्नं वा ? प्रथमे सत्यमसत्यं वा ? नाद्योऽपसिद्धान्तात् । अन्त्ये तु तस्य मिथ्यात्वेनोपलम्भे तस्मा उपदेशासम्भवः । सत्यत्वेनोपलम्भे तु भ्रान्तत्वेनाचार्यत्वहानिराचार्यस्य । अभिन्नत्वपक्षे कथमुपदेशः । अनुपलम्भेति पक्षे तु कस्मा उपदिशति ?

एवमात्मभेदानभ्युपगमे बद्धमुक्तव्यवस्थाभङ्गश्च भवेत् ।" (गीताया आनन्दभाष्यम् २।१२)इति ।

श्रीत प्रमेयचन्द्रिकायां श्री श्रियानन्दाचार्यैरप्युक्तम्—

एककाले सुखी चैको दुःखी चान्योऽवलोक्यते ।
विज्ञैः परस्परं भेदश्चात्मनां मन्यते ततः ॥ २१ ॥

सुखीदुःखीतिभेदो नन्वन्तःकरणभेदतः ।
मैवं कुतो यतश्चैवं सौभर्यादौ ऋषं न हि ॥ २२ ॥
मुक्तामुक्तत्वभावश्च बोध्यबोधकता तथा ।
मृतामृतव्यवस्था च ह्यात्मैक्ये सम्भवेन्न हि ॥ २३ ॥
नन्वात्मनामभेदोऽस्ति 'भोक्ता भोग्यमि'तिश्रुतेः ।
मैवं यतः प्रकारैक्याज्जीवानां च तथा श्रुतिः ॥ २४ ॥

आहुश्च नवरत्नीकारा श्रीश्यामानन्दाचार्या —अह देहेन्द्रिया दिभ्य प्राणेभ्यो ज्ञानतोऽपि च । अन्यात्मभ्यश्च रामाद्धि भिन्नो रामतनुस्तथा ॥" इति ।

अतश्चैकजीववाद श्रुतिविरुद्धो युक्तिविरुद्धश्चास्तीति बोध्यम् ।

बद्धजीवाः

जीवास्त्रिविधा बद्धमुक्तनित्यभेदात् । उक्तञ्चेत्थमेव भाष्ये —

"एतेन जीवाना बद्धमुक्तनित्यभेदेन त्रैविध्यमपि दर्शित भवतीत्यन्यत्र विस्तर । (श्रीरामानन्दभाष्यम् १।१।१४) इति । तत्राना-दिकालीनस्वनियामकपुण्यपापात्मककर्मानुगुणजननिधनत्वादिधर्मम।पन्ना ब्रह्मकोटादयो जीवा बद्धा । भगवान् श्रीरामोऽपि जीवस्य प्राक्तन कर्मानुसृत्यैव फलप्रदोऽनो न तत्र स्वातन्त्र्यप्रयुक्तवैषम्यनैर्घृण्य दोषोऽत एवोक्तमाचार्यशिरोमणिश्रीश्रुतानन्दाचार्यैः —

'विषारञ्च रामो दयाब्धिस्तथात्वे
दयाशून्यता पक्षपातञ्च नैति ।
प्रकारे विषारस्तथा चित्रसृष्टौ
च हेतुर्यतः प्राणिना प्राग्यकर्म ॥" इति ।

(श्रीतत्त्वसिद्धान्तबिन्दु)

मुक्तजीवाः

अनन्तजन्मोपार्जितपुण्योदयेन सत्त्वोद्रेकात् सद्गुरुमुपसद्य ततोऽनन्तब्रह्माण्डनायकनिखिलदोषप्रत्यनीकानन्तकल्याणगुणसागरं परं ब्रह्म भगवन्तं श्रीराममवबुध्य तद्भक्तिप्रपत्तिभ्यां बन्धकारणभूतानि कर्माणि विनाश्य कर्मोपार्जितदेहं परित्यज्य दिव्ये श्रीसाकेतधामनि भगवत्सायुज्यमवाप्ता जीवा मुक्ताः।

भक्तिः

भक्तिश्च ध्रुवा स्मृतिः। उक्तञ्च महर्षिश्रीपुरुषोत्तमाचार्यबोधायनोक्तसाधनसमकस्य पदवाक्यात्मिकायां साधनदीपिकाख्यायां व्याख्यायां श्रीबोधायनचरणचञ्चरीकैराचार्यसुरेन्द्रैः श्रीगङ्गाधराचार्यैः—

रामस्य ब्रह्मणोऽनन्यभक्त्यैव मुक्तिराप्यते।
भक्तिर्ध्रुवा स्मृतिः सा च विवेकादिकसप्तकात् ॥ इति ॥

भक्तिमधिकृत्याभिहितं चापरबोधायनाचार्यजगद्गुरुश्रीदेवानन्दाचार्यवेदान्तविद्यानिधिभिः प्रामिताक्षराकारैर्योगपञ्चके—

"श्रीरामस्यानवच्छिन्नं स्मरणं प्रीतिपूर्वकम्।
श्रीमद्वैष्णवाचार्यैर्भक्तियोगतया मतम् ॥२३॥
अङ्गमष्टाङ्गयोगोऽङ्गी भक्तियोगः प्रकीर्त्तितः।
लभ्यते भगवान् रामो भक्तियोगेन नान्यथा ॥२३॥
भक्तिर्बोधायनप्रोक्तैर्विवेकादिकसाधनैः।
ध्यानध्रुवस्मृतीत्यादिशब्दवाच्या प्रजायते॥२४॥
संसारिता मताऽभक्त्या भक्त्या मुक्तिरुदीरिता।
आमृत्युसमयं भक्तेरावृत्तिश्च मता श्रुतौ ॥२५॥
प्रारब्धान्ते मता भक्तिर्मुक्तिदा चार्चिरादिना।
अङ्गिनो च मता भक्तिरङ्गे तज्ज्ञानकर्मणी ॥२६॥

"श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्" ॥३७॥

एवं महापुराणे श्रीभागवते हि मुक्तिदाः।
भक्तेश्च नवधा भेदाः प्रह्लादेन प्रकीर्त्तिताः॥३८॥

परिराराधितो रामो भक्तैः परं प्रसीदति।
योगक्षेमं वहँल्लोके चान्ते मुक्तिं प्रयच्छति ॥३९॥

घृतं जलात् तथा तैलं सिकतातश्च निःसरेत्।
तथाऽपि भगवद्भक्तिं विना मुक्तेर्न सम्भवः ॥४०॥

पूर्वाघनाशिनी चाथ परापद्लेपवर्जिनी।
भक्तिरेव ततः सैव पुंसां संसारनाशिनी" ॥४१॥ इति।

आनन्दभाष्यकारैराचार्यसार्वभौमैर्भगवद्भिः श्रीरामानन्दाचार्यैः
प्यभिहितमेवमेव श्रीवैष्णवमताब्जभास्करे—

"सा तैलधारासमनित्यसंस्मृतेः सन्तानरूपेशि परानुरक्तिः
भक्तिर्विवेकादिकसप्तजन्या तथा यमाद्यष्टसुबोधकाङ्गाः ॥ इ

श्रीरामानन्दभाष्येऽपि—"सा च भक्तिः परमप्रेयो भगवदितर
तृष्ण्यपूर्वकपरमपुरुषानुरागरूपो ज्ञानविशेष एव"
(आ० भा० १।१।१) इति

प्रपत्तिः

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। अहं त्वा सर्व
पेभ्यो मोक्षयिष्यामि मा शुचः" (गी० १८।६६) इत्येतस्य श्लो
स्यानन्दभाष्ये भगवद्भिः श्रीरामानन्दाचार्यैः प्रपत्तेः स्वरूपमपि निरू

स प्रार्थित एव सर्वं करोतीत्युपायत्वप्रार्थनाऽवश्यं कर्त्तव्येत्यपि ध्येयम्। सेयमुपायत्वप्रार्थनैव प्रपत्तिः।.....

प्रार्थनांशेन शरणागतिपदवाच्य आत्मनिक्षेपांशेन न्यासपदवाच्यश्च प्रपत्तियोग एव। आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनं रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं कार्पण्यञ्चेतीमानि प्रपत्तियोगस्य षडंगानि। तथा हि शास्त्रं "आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्। रक्षिष्यसीतीति विश्वासो गोतृत्ववरणं तथा। आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः।" (अहिर्बुध्निसंहिता ३७।२८) इति। पञ्चापीमानि प्रपत्यङ्गानि बोधायनवृत्तिकृता भगवता श्रीपुरुषोत्तमाचार्यबोधायनेन श्रीपुरुषोत्तमप्रपत्तिषट्के विहितानि। तथा हि—

"राम दीनोऽनुकूलोऽहं विश्वस्तोऽप्रातिकूल्यवान्।
त्वयि न्यस्यामि चात्मानं पाहि मां पुरुषोत्तम!॥"

(गीताया आनन्दभाष्यम् १८।६६)

प्रपत्तिं समधिकृत्य व्याहृतं चापरबोधायनाचार्यैर्जगद्गुरुभिः श्रीदेवानन्दाचार्यैर्वेदान्तविद्यानिधिभिः प्रमिताक्षराकारैर्योगपञ्चके-

"श्रीरामाय ससीताय स्वात्मस्वीयानुबन्धिनाम्।
रक्षाभरार्पणं पुंसो न्यासयोगः प्रकीर्त्तितः॥४२॥
आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्।
विश्वासोऽकिञ्चनत्वं च गोप्तृत्ववरणं तथा॥४३॥
आचार्यैरुक्तमेतद्धि न्यासयोगाङ्गपञ्चकम्।
अङ्गपुष्टौ प्रजातायामङ्गिपुष्टिर्मता ध्रुवा॥४४॥
श्रीमद्रामानुकूलोऽहं भविष्याम्यधुनतः खलु।
इत्यानुकूल्यसङ्कल्पो न्यासयोगाङ्गमादिमम्॥४५॥

श्रीरामप्रतिकूलोऽहं भविष्याम्यद्यतो न हि ।
एतन्न्यासद्वितीयाङ्गं प्रातिकूल्यस्य वर्जनम् ॥४६॥
अवश्यं जानकीनाथो मम रक्षां विधास्यति ।
विश्वासनामकं चैतन्न्यासाङ्गं हि तृतीयकम् ॥४७॥
त्वामेव हि प्रपन्नं त्वं रक्ष राम शरण्य माम् ।
एतन्न्यासचतुर्थाङ्गं गोप्तृत्ववरणं मतम् ॥४८॥
प्रपन्नं साधनैर्हीनं मां पाहि रघुनन्दन ।
न्यासस्य पञ्चमं चाङ्गमाकिञ्चन्यमिति स्मृतम् ॥४९॥
मानसादिविभेदेन न्यासोऽयं त्रिविधो मतः ।
न्यासस्यैवापरे नाम्नी प्रपत्तिश्शरणागतौ ॥५०॥
प्रतिज्ञातं च रामेण प्रपन्नस्या सर्वतोऽभयम् ।
राम एव प्रपद्ये यद् रामो द्विर्नाभिभाषते ॥५१॥
अयं प्रपत्तियोगो हि प्रारब्धस्यापि नाशकः ।
अस्य प्रपत्तियोगस्याधिकारः सर्वदेहिनाम्" ॥५२॥ इति ।

मुक्तावस्थायां "निरञ्जनः परमं साम्यमुपैति" इति श्रुतिप्रतिपादितपरमसाम्यापन्नोऽपि मुक्तजीवः सर्वेश्वरो न भवति साम्यस्य भेदघटितत्वादत एव सूत्रितं ब्रह्ममीमांसायां भगवता बादरायणेन— "अगदव्यापारवर्ज्यं प्रकरणादसन्निहितत्वाच्च" (ब्र.सू.४।४।१७) इति। अभिहितञ्चैनस्य सूत्रस्यानन्दभाष्ये आचार्यसार्वभौमैर्भगवद्भिः श्रीरामानन्दाचार्यैः—"पूर्वं सङ्कल्पमात्रेण मुक्तस्य सर्वकामावाप्तिरभिहिताऽनन्याधिपतित्वञ्चोक्तम् । तथा सतीदानीं विचार्यते । किं मुक्तस्य सङ्कल्पमात्रेण परमपुरुषस्येव सर्वेश्वरत्वमपि प्राप्यते आहोस्वित् सर्वकामप्राप्तिरूपमैश्वर्यमेवेति संशये सर्वजगतामीश्वरत्वमपि । कुतः ? मुक्तत्वादनन्याधिपतित्वेनार्थात् सर्वाधिपतित्वोपपत्त्या परमेश्वरस्येव

सर्वनियन्तृत्वोपपत्तेः। "निरञ्जनः परमं साम्यमुपैति" इति परमपुरुषसाम्यापत्तिश्रवणाज्जगत्सृष्ट्यादिकर्तृत्वमपि मुक्तस्य सम्भवतीति प्राप्तेऽभिधीयते—जगद्व्यापारवर्ज्जमिति। जगद्व्यापारो जगदुत्पत्त्यादिकर्तृत्वं तच्चाशेषचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदनियमनं तद्वर्ज्जमविघातिरोधानराहित्यपूर्वकपरब्रह्माऽनुभवरूपम् "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति श्रुत्यभिहितसङ्कल्पमात्रेण सर्वकामावाप्तिरूपं मुक्तस्यैश्वर्यमस्ति न तु जगदीश्वरत्वमपि, तत्तु परमपुरुषस्यासाधारणम्। कुत? प्रकरणात्। 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्म।" (तै.३।१) इति परमात्मानमेव प्रकृत्याम्नात न तु मुक्तात्मानम्। एव "तदैक्षत बहुस्याम्प्रजायेयेति तत्तेजोऽसृजत" (छा० ६।२।३) इत्यादिप्रकरणान्तरेष्वपि ज्ञेयम्। असन्निहितत्वाच्चापि मुक्तस्य। न हि जगन्नियमनादिषु मुक्तस्य सान्निध्यमप्यस्ति येन तस्याप्यय व्यापारः स्यात्।" (आनन्दभाष्य ४।४।१७) इति।

तस्मान्मुक्तो जीवो ब्रह्मभिन्न एव न तु ब्रह्मस्वरूप इति बोध्यम्।

नित्यमुक्तजीवाः

"यत्र पूर्वे साध्या सन्ति देवा" इत्यादिश्रुतिप्रतिपादिता हनुमदादयो नित्यमुक्तास्तु भगवत्प्रतिकूलाचरणाभावात् कदाचिदपि ससारं नाप्नुवन्ति। नित्यमुक्तानामवतारास्तु भगवदिच्छया स्वेच्छया वा भवन्ति। भगवन्नित्येच्छया सनातनत्वेन व्यवस्थापितास्तेषामधिकारविशेषा इति ध्येयम्।

उक्तं च जीवतत्त्वमधिकृत्याचार्यसार्वभौमैरानन्दभाष्यकारैर्भगवद्भिः श्रीरामानन्दाचार्यैर्वेदान्तसारे—

"नित्योऽज्ञश्चेतनोऽजः सततपरवशः सूक्ष्मतोऽत्यन्तसूक्ष्मो भिन्नो बद्धादिभेदैः प्रतिकुणपमसौ नैकधा सूरिवर्यैः। श्रीशाक्रान्ताळयस्थो निजकृतिफलभुक् तत्सहायोऽभिमानी जीवः सम्प्रोच्यते श्रीहरिपदसुमते तत्त्वजिज्ञासुवेद्यः॥" इति।

इत्यनुभवानन्दद्वारपीठनामकश्रीरामानन्दपीठसंस्थापकैर्जगद्गुरु-
श्रीमदनुभवानन्दाचार्यैर्विरचिते श्रीतार्थसंग्रहे
जीवनिरूपणात्मकः प्रथमः परिच्छेदः ॥१॥

—*—

२—अथाचिदर्थनिरूपणम्

अथ क्रमप्राप्तमचित्तत्त्वमभिधीयते—

अचिन्नाम ज्ञानविरहितं तत्त्वम्। तच्चावस्थान्तरापत्तिरूपविकाराश्रयरूपमत एव द्रव्यम्। तद् द्विविधं जडाजडभेदात्। तत्र परप्रकाश्यं जडम्। तद्भिन्नमजडम्। अजडं द्विविधं पराक्प्रत्यग्भेदात्। तत्र स्वयंप्रकाशमानत्वे सति परस्मा एव भासमानत्वं पराक्त्वम्। परागपि द्विविधं शुद्धसत्त्वज्ञानभेदात्।

शुद्धसत्त्वम्

शुद्धसत्त्वं नाम त्रिगुणभिन्नं शुद्धसत्त्वगुणाधिकरणमचिद्द्रव्यम्। तन्नित्यमजडमप्रदेशं परिच्छिन्नमूर्त्तप्रदेशं चान्तरहितम्। "आदित्यवर्णं

तमसः परस्तात्" (श्वेता० ३।८) "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" (नृ०पु० ५।१०) इत्यादिश्रुतयस्तत्र प्रमाणभूताः। तदीश्वरसंकल्पान्नित्यमुक्तेश्वराणां भोग्यभोगोपकरणभोगस्थानरूपं भवति। नित्यविभूतिनित्यधामपरमधामपरमव्योमाक्षरधामसाकेतादिशब्दाः शुद्धसत्त्वपर्यायाः।

ज्ञानम्

अर्थप्रकाशो ज्ञानम्। तच्च प्रभावद् द्रव्यगुणात्मकमजडं विभुद्रव्यम्। तच्चेश्वरस्य नित्यानां च सदैव विभु, मुक्तानां बद्धावस्थायां तिरोहितं मुक्तौ विभु बद्धानां तु तिरोहितमेव।

ज्ञानं हि नित्यं द्रव्यम् "न विज्ञातेर्विपरिलोपो विद्यते" (बृ० ४।३।३०) इतिश्रुतेः। 'ज्ञानमुत्पन्नम्' 'ज्ञानं नष्टम्' इत्यादिव्यवहारस्तु ज्ञानसम्बन्धिसंकोचविकासावस्थाहेतुक एवेति ध्येयम्। ज्ञानं, मतिः, प्रज्ञा, संवित्, धिषणा, धीः, मनीषा, शेमुषी, बुद्धिरित्यादयः शब्दा ज्ञानपर्यायाः।

परप्रकाश्यं जडमित्युक्तं प्राक्। जडं द्विविधं प्रकृतिकालभेदात्। तथा चोक्तं श्रौतसिद्धान्तविन्दुकारश्रीश्रुतानन्दाचार्यचरणैः—

अचिन्नाम तत्त्वं द्विधा ज्ञानशून्यं
जडञ्चाजडं नैव मिथ्या कदाचित्।
जडं मिश्रसत्त्वं तथा कालतत्त्वं
मनीषाऽजडं शुद्धरूपं च सत्त्वम् ॥इति॥

अत्र मिश्रसत्त्वपदेनाविद्यामायाद्यपरपर्याया प्रकृतिरुक्ता।

प्रकृतिः

प्रकृतिर्नाम सत्त्वरजस्तमोरूपगुणत्रयाश्रयरूप द्रव्यम् । तत्र सत्त्वं नाम ज्ञानसुखतदुभयसङ्गोत्पादको गुण । रजोनाम रागतृष्णाकर्मसङ्गोत्पादको गुण । तमोनाम विपरीतज्ञानानवधानालस्यनिद्रोत्पादको गुण । उक्त च श्रौततत्त्वसमुच्चयकारैराचार्यसार्वभौमैर्भगवद्भि श्रीराघवानन्दाचार्यैः—"तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्। सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ रजोरागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ तमस्त्वज्ञानज विद्धि मोहन सर्वदेहिनाम् ।" (गीता) इति भगवद्वचनप्रामाण्यात् सत्व नाम ज्ञानस्य सुखस्य तदुभयसङ्गस्य च जनको गुण । रजोनाम रागतृष्णा कर्मणा सङ्गाना जनको गुण । तमोनाम विपरीतज्ञानानवधानालस्य निद्राणा जनको गुण ।" (श्रौततत्त्वसमुच्चय) इति ।

प्रलये प्रकृतस्त्रयोऽपि गुणा साम्यमापन्ना एव भवन्ति । "तदैक्षत बहुस्याम्' इतीश्वरसङ्कल्पवशात् प्रकृतिर्गुणवैषम्यप्रयुक्ता कार्योन्मुखावस्था भवाप्याव्यक्तपदवाच्या भवति ।

महत्तत्त्वम

अव्यक्तपदवाच्याया प्रकृतेर्य प्रथमो विकार स महान् । स च त्रिविध । सात्विकराजसतामसभेदात् ।

अहङ्कारः

महत प्रथमो विकारोऽहङ्कार । सोऽपि सात्त्विकादिभेदात् त्रिविध । एते सात्विकराजसतामसाख्या अहङ्कारा क्रमाद् वैकारिक-तैजसभूतशब्दैरप्यभिधीयन्ते ।

एकादशेन्द्रियाणि

राजसाहङ्कारसहकृतात् सात्विकाहङ्कारादेकादशेन्द्रियाणि जायन्ते। तानि द्विविधानि। ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च।

ज्ञानप्रसरणे शक्तानीन्द्रियाणि। ज्ञानेन्द्रियाणि। तानि षड्विधानि। मनः श्रोत्रं त्वक् चक्षू रसनं घ्राणञ्चेति।

तत्र स्मृत्यादिकरणमिन्द्रियं मनः। हृदयदेशवृत्तिः।

शब्दमात्रग्रहणसमर्थमिन्द्रियं श्रोत्रम्। कर्णशष्कुलीवृत्ति। सर्पाणां तु नेत्रगोलकवृत्ति।

स्पर्शमात्रग्रहणसमर्थमिन्द्रियं त्वक्। सर्वशरीरवृत्ति।

रूपमात्रग्रहणसमर्थमिन्द्रिय चक्षुः। नेत्रवृत्ति।

रसमात्रग्रहणसमर्थमिन्द्रियं रसनम्। जिह्वाग्रवृत्ति।

गन्धमात्रग्रहणसमर्थमिन्द्रियं घ्राणम्। नासाग्रवृत्ति।

उच्चारणाद्यन्यतमकर्मसमर्थानीन्द्रियाणि कर्मेन्द्रियाणि। तानि पञ्चविधानि वाक्पाणिपादपायूपस्थभेदात्।

तत्रोच्चारणकरणमिन्द्रियं वाक्। हृदयादिस्थानाष्टकवृत्तिः।

शिल्पादिकरणमिन्द्रियं पाणिः। अंगुल्यादिवृत्तिः।

सञ्चारकरणमिन्द्रियं पादः। चरणादिवृत्तिः।

मलोत्सर्जनकरणमिन्द्रियं पायु.। गुदादिवृत्तिः।

मैथुनकरणमिन्द्रियमुपस्थ.। मेहनादिवृत्तिः।

तन्मात्रपञ्चकं भूतपञ्चकं च

राजसाहङ्कारसहकृतात् तामसाहङ्काराच्छब्दतन्मात्रमुत्पद्यते। तन्मात्रं नाम भूतोपादानं द्रव्यम्। तत् पञ्चविधं शब्दस्पर्शरूपरसगन्ध-

भेदात् । विशिष्टशब्दादिगुणाश्रयो भूतम् । तदपि पञ्चविधमाकाशवायुतेजोऽप्पृथिवीभेदात् ।

तत्र तामसाहङ्काराव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं शब्दतन्मात्रम् । तस्मादाकाशमुत्पद्यते । रूपरहितं विशिष्टशब्दाधिकरणं द्रव्यमाकाशम् । तच्च शब्दगुणकम् ।

आकाशाव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं स्पर्शतन्मात्रम् । तस्माद् वायुरुत्पद्यते । रूपरहितं विशिष्टस्पर्शवद् द्रव्यं वायुः । स च शब्दस्पर्शगुणकः । वायोः स्पर्शोऽनुष्णाशीतोऽस्तीति बोध्यम् । देहधारको वायुविशेषः प्राणः। स पञ्चविधः । प्राणापानव्यानोदानसमानभेदात् । तत्र प्राणो हृदयवृत्तिरपानो गुदवृत्तिर्व्यानः सर्वशरीरवृत्तिरुदानः कण्ठवृत्तिः समानश्च नाभिवृत्तिरिति बोध्यम् ।

वाय्वव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं रूपतन्मात्रम् । तस्मात्तेज उत्पद्यते । उष्णस्पर्शवद्द्रव्य तेजः । तच्च शब्दस्पर्शरूपगुणकम् । तेजसो रूपं भास्वरं शुक्लमिति बोध्यम् ।

तेजोऽव्यविहितोत्तरावस्थाविशिष्टं द्रव्यं रसतन्मात्रम् । तस्मादाप उत्पद्यन्ते । शीतस्पर्शवत्य आपः । शब्दस्पर्शरूपरसा अपां गुणाः अपां रूपमभास्वरं शुक्लं रसश्च मधुर इति बोध्यम् ।

अबव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं गन्धतन्मात्रम् । तस्मात् पृथिव्युत्पद्यते । विशिष्टगन्धवद् द्रव्यं पृथिवी । सा च शब्दादिगुणपञ्चकशालिनी । पृथिव्यां स्पर्शोऽनुष्णाशीतो रूपं शुक्लरक्तकृष्णपीतेति चतुर्विधं रसो मधुराम्लल्वणकटुकषायतिक्तभेदात् षड्विधो गन्धो सुरभ्य

सुरभीति द्विविधः । तत्र रूपमभास्वरशुक्लमिति बोध्यम् । पृथिव्या रूपरसगन्धस्पर्शाः पाकनिमित्तकाः ।

पञ्चीकरणम्

सर्वेश्वरो भगवान् श्रीरामो भूतसृष्टिं विधायैकैकस्य भूतस्य समानभागद्वयं कृत्वैकं विहायापरस्य समभागचतुष्टयं विधायकक तदर्धातिरिक्तेषु भूतार्धेषु संयोजयति । एतदेव भूतानां पञ्चीकरणम् । अत एवाकाशादिषु सर्वेषु भूतेषु शब्दादीनां सर्वेषां गुणानामुपलब्धिः । इत्थं सर्वभूतेषु सर्वभूतानां विद्यमानत्वेऽपि पृथिव्यादिव्यपदेशः स्वभागस्य भूयस्त्वादपरभागस्य चाल्पीयस्त्वादेवेति बोध्यम् । वेदे त्रिवृत्करणोपदेशः पञ्चीकरणसप्तीकरणयोरप्युपलक्षणम् ।

कालः

भूतादिव्यवहारजनको गुणत्रयशून्यो जडद्रव्यविशेषः कालः । अखण्डकालो नित्यो विभुपरिमाणश्च । निमेषादिरूपस्त्वनित्यः ।

उक्तं चाचित्तत्त्वमधिकृत्यापरबोधायनाचार्यजगद्गुरुश्रीदेवानन्दाचार्यवेदान्तविद्यानिधिभिः प्रमिताक्षराकारैर्योगपञ्चके—

"चिदात्माभिहितो द्रव्यं चतुर्धाऽचिदचेतनम् ।
जीवेशयोर्गुणो ज्ञानमर्थाभासोऽजडं विभु ॥ १९ ॥
सकोच्यः कर्मणा नित्योऽन्तरङ्गं भक्तिसाधनम् ।
शुद्धसत्वगुणा नित्यविभूतिरजडा मता ॥२०॥
कालावस्था तथा विम्बीभोग्यभागस्थलादिका ।
सत्वादिस्थितः कालो विभुर्जडो हरेस्तनुः ॥२१॥

कालभिन्ना जडा नित्या प्रकृतिस्त्रिगुणाश्रय ।
तद्विकारो महानाद्यस्तदभेदा सात्विकादय ॥२२॥
सत्वादिगुणभेदेनाहङ्कारस्त्रिविधस्तत ।
इन्द्रियाणि दशैक च सात्विकाहकृतेरथ ॥२३॥
तामसाहंकृतेश्चाथ राजससहकारत ।
जायते शब्दतन्मात्र स्पर्शहेतुस्ततो नभ ॥२४॥
स्पर्शाद् वायुस्ततो रूपं रूपात् तेजस्ततो रस ।
रसादापस्तथा चाद्भ्यो गन्धो जाता क्षितिस्तत ॥२५॥
तन्मात्रं द्रव्यरूपं चाद्रव्य शब्दादयो गुणा ।
शब्दादयो गुणा भिन्ना शब्दादिकतन्मात्रत ॥२६॥
पञ्चीकृत्य च भूतेभ्यो रामो जगत करोति हि ।
स एव रक्षति तद्वत् प्रलय विदधात्यपि ॥२७॥
पञ्चीकरणत पूर्वा सृष्टि समष्टिरुच्यते ।
उत्तरा व्यष्टिसृष्टिस्तु क्रियते ब्रह्मदोहना "॥२८॥ इति ।

उक्तं च प्रकृतितत्त्वमधिकृत्याचार्यसार्वभौमैरानन्दभाष्यकारैर्भगवद्भि श्रीरामानन्दाचार्यैर्वेदान्तसारे—

"पृष्टानामेकमाद्यं निरूपमपि शृणु तद्भेदतो नामभेदै-
र्नित्याऽज्ञाऽचेतना सा प्रकृतिरविकृतिर्विश्वयोनि शुभैका ।
नाना वर्णात्मकाजा त्रिगुणसुनित्याऽव्यक्तशब्दाभिधेया
निर्व्यापारा परार्था महदहमितिसूरच्यते तत्त्वविद्भिः ।" इति ।

इत्यनुभवानन्दद्वारपीठनामकश्रीरामानन्दपीठसंस्थापकजगद्गुरु—

श्रीमदनुभवानन्दाचार्यविरचिते श्रौतार्थसग्रहेऽचिदर्थ
निरूपणात्मको द्वितीय परिच्छेद ॥ २ ॥

३—अथेश्वरार्थनिरूपणम्

ईश्वरस्तु विभुश्चेतनः। विशेषणानुपादाने जीवे विशेष्यानुपादाने काले ऽतिप्रसङ्गवारणायोभयोपादानम्। तत्र चेतनत्व नाम ज्ञानाधिकरणत्वम्। विभुत्वं तु स्वरूपतो ज्ञानतः शरीरतश्च व्यापकत्वम्।

स ईश्वरः 'सत्वादयो न सन्तीशे यत्र तु प्राकृता गुणाः' इति वचनप्रमाण्याद्धेयप्राकृतगुणरहितः, 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकीज्ञानबलक्रिया च' इत्यादिश्रुतिप्रामाण्यान्निरुपाधिकानन्तकल्याणगुणविशिष्टः, 'आनन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतेः सच्चिदानन्दरूपः, देशकालवस्तुपरिच्छेदशून्यात्मकानन्तत्वविशिष्टत्वादनन्तः, ब्रह्मशब्दवाच्यः, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' 'यतो वा इमानि भूतानि जातानि.....' इत्यादिश्रुतेरस्य जगतोऽभिन्ननिमित्तोपादानकारणरूपो भक्तिमुक्तिप्रदश्चास्ति।

ईश्वरस्य जगदुपादानत्वस्वीकारे निर्विकारत्वप्रतिपादकश्रुतिविरोधस्तु न शङ्कनीयस्तत्र सद्वारकोपादानताया एव स्वीकारात्। उक्तं च जगद्गुरुभिः श्रीश्रुतान्दाचार्यैः—विकारश्च गमो दयाम्बिस्तथात्वे दयाशून्यतां पक्षापातञ्च नेति। प्रकारे विकारस्तथा चित्रसृष्टौ च हेतुर्यतः प्राणिनां प्राच्यकर्म॥" इति।

"रमन्ते योगिनो यस्मिन् सत्यानन्दे चिदात्मनि। इति रामपदेनासौ परं ब्रह्माभिधीयते॥" (रामतापनीय) इतिश्रुतिप्रमाण्याद् ब्रह्मपदाभिधेयः स चेश्वरः श्रीराम एव।

"ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयगुणादिभिः॥" "तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः। शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारतः॥" इत्यादिवचनप्रामाण्याद् भगशब्दवाच्यज्ञानशक्तिबलैश्वर्यवीर्यतेजोरूपषड्विधैश्वर्यशालित्वात् स हि भगवच्छब्दवाच्यश्च। उक्तं च बोधायनवृत्तिकारस्य श्रीपुरुषोत्तमाचार्यस्य शिष्यवर्यैः श्रीगङ्गधराचार्यैः—"ज्ञानशक्तिबलस्वयवीर्यतेजांसि षड्गुणाः। भगत्वेनेरिताः सन्ति श्रीरामे भगवान् स तत्॥ श्रीरामे भगवच्छब्दो मुख्यवृत्त्या प्रवर्तते। गौण एव स चान्यत्र षड्विधैश्वर्यलेशतः॥" (श्रीरामभगवत्त्वम्) इति।

'नित्यो नित्यानाम्' इत्यादिश्रुतिप्रामाण्यात् स चेश्वरो नित्यः "यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्" (मु० ३।१।३) इत्यादिश्रुतेर्दिव्यमङ्गलविग्रहश्चास्ति। अत एवोक्तं भगवद्भिरानन्दभाष्यकारैः श्रीरामानन्दाचार्यैराचार्यसार्वभौमैः—"अतएव श्रुत्युपबृंहणीभूतेतिहासपुराणादिषु बहुशस्तत्र तत्र भगवतो दिव्यमङ्गलविग्रहस्योपवर्णनं सङ्गच्छते।" (आनन्दभाष्य १।१।२१) इति।

स च सर्वेश्वरो भगवान् श्रीराम पराव्यूहविभवान्तर्याम्यर्चावतारस्वरूपेण पञ्चधा स्थित। तथा चागमः—

"मम प्रकाराः पञ्चेति प्राहुर्वेदान्तपारगाः।
परो व्यूहश्च विभवो नियन्ता सर्वदेहिनाम्॥
मर्त्यावतारश्च तथा दयालुः पुरुषाकृतिः।

इत्येवं पञ्चधा प्राहुर्मां रहस्यविदो जना ॥" इति
(विष्वक्सेनसंहिता)

समुदीरितश्चैतदीश्वरतत्त्वमधिकृत्य प्रमेयोद्देश—

भास्करे सिद्धान्तवाचस्पतिजगद्गुरुश्रीचिदानन्दाचार्यैः—

"रामश्च ब्रह्मकर्त्ता हि विष्णुत्वमुपजिग्मिवान् ।
परव्यूहादिरूपेण सीतानाथश्च पञ्चधा ॥७४॥
परश्च परलोके हि साकेते सोऽधिराजते ।
दिव्यदेहगुणो नित्यो दिव्यशस्त्रास्त्रभूषणः ॥७५॥
अनन्तकरुणावत्या सीतया जगदम्बया ।
सिंहासने समासीनो दिव्ये दिव्यपुरे परे ॥७६॥
सर्वज्ञः सर्वशक्तिश्च भगवान् करुणाम्बुधिः ।
नित्यमुक्तैः स्तुतश्चाथ वेदवेद्यः परात्परः ॥७७॥
व्यूहतां याति रामश्च सृष्ट्याद्यर्थमुपासितुम् ।
चतुर्धा च मतो व्यूहो वासुदेवादिभेदतः ॥७८॥
वासुदेवात् त्रिधा व्यूहा भवन्ति केशवादयः ।
सङ्कर्षणाच्च गोविन्दादयस्त्रिधा भवन्ति हि ॥७९॥
प्रद्युम्नाच्च त्रिधा व्यूहा ऋषीकेशादयो मताः ।
भवन्त्यथानिरुद्धाच्च त्रयः श्रीवामनादयः ॥८०॥
रामः सर्वावताराणामवतारी समीरितः ।
परित्राणं च साधूनामवतारप्रयोजनम् ॥८१॥
सर्वेभ्यश्चाभयं दत्ते रामः सकृत् प्रपत्तितः ।
स्वाश्रितस्यापराधांश्च रामः स्मरति नैव हि ॥८२॥

साक्षाद गौणस्तथाऽऽवेश इत्येव विभवास्त्रय ।
मुख्यमुख्यतरत्वादिभेदात् साक्षात् त्रिधा मत ॥८३॥
नृसिंहवामनभेदाद द्विधा मुख्य प्रकीर्त्तित ।
मुख्यतरश्च श्रीकृष्णो रामो मुख्यतमस्तथा ॥८४॥
मत्स्यकूर्मादिभेदैश्च मनो गौणस्त्वनेकधा ।
कलास्वरूपशक्तीनामावेशात् त्रिविधोऽन्तिम ॥८५॥
विभवाश्च कलावेशात् पृथुधन्वन्तरादय ।
शुद्धावेशस्तथाऽशुद्धावेशो द्विधा च मध्यम ॥८६॥
शुद्धावेशाश्च विज्ञेया श्रीव्यासकपिलादय ।
मता परशुरामादावशुद्धावेशिता बुधै ॥८७॥
शक्त्यावेशो द्विधा शुद्धाशुद्धत्वभेदतो मत ।
आदिमोऽपि द्विधा मुख्यगौणभेदात् प्रकीर्त्तित ॥८८॥
हंसादयो मता मुख्या गौणा बुद्धादयो मता ।
अन्तिमोऽपि द्विधा मुख्यगौणभेदादुदीरित ॥८९॥
तत्राऽब्रह्मादयो मुख्या गौणा मन्वादयो मता ।
अन्तर्यामी द्विधा मूर्त्तामूर्त्तभेदात् प्रभाषित ॥९०॥
रथापितो वैष्णवैर्मन्त्रैश्चतुर्थाऽर्चावतारक ।
स्वय व्यक्तश्च दैवश्च सैद्धश्च मानुष स्मृत ॥९१॥ इति ।

तत्र परो नाम नित्यधाम्नि श्रीमाकेते जगज्जनन्या श्रीसीतास्वया सह दिव्यसिंहासनोपरि विराजमानो दिव्यायुधालंकारविशिष्टविमलशीला नित्यं नित्यमुक्तपरिसेवमान । सर्वावतारी परिपूर्णब्रह्म भगवान् श्रीराम ।

जगत् सृष्टुमुपासितुं च वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धरूपेण चतुर्धाऽवस्थितो भगवान् श्रीरामो व्यूहः । तत्र वासुदेवे ज्ञानशक्त्यादिगुणषट्कं सङ्कर्षणे ज्ञानबलद्वयं प्रद्युम्ने वीर्यैश्वर्यद्वयमनिरुद्धे च तेजःशक्तिद्वयं वर्त्तते ।

मत्स्यादितत्तत्सजातीयरूपेण स्वेच्छयाविर्भूतो भगवान् श्रीरामो विभवः ।

योगदृष्ट्याऽनुभूयमानः सर्वत्र सर्वदा सर्वथा च जीवस्य परमसुहृद्रूपेण हृदयस्थितो भगवान् श्रीरामोऽन्तर्यामी ।

देशकालादिनियमविहीनस्तत्तत्स्थले भक्ताभिमतहिरण्यादिशरीरेऽप्राकृतशरीरविशिष्टरूपेण वर्त्तमानः स्नानभोजनादिष्वर्चकायत्ततां गतो मूर्तिविशेषरूपो भगवान् श्रीरामोऽर्चावतारः ।

उक्तं चेश्वरतत्त्वमधिकृत्याचार्यसार्वभौमैरानन्दभाष्यकारैर्भगवद्भिः श्रीरामानन्दाचार्यैर्वेदान्तसारे—

"विश्वं जातं यतोऽद्धा यदवितमखिलं लीनमप्यस्ति यस्मिन्
सूर्यो यत्तेजसेन्दुः सकलमविरतं भासयत्येतदेषः ।
यद्भीत्या याति वातोऽनिरपि सुतलं याति नैवेश्वरो ज्ञः
साक्षी कूटस्थ एको बहुशुभगुणवानव्ययो विश्वभर्त्ता ॥३॥
श्रीमानर्च्यः शरण्यो बहुविधविबुधैर्योगिगम्यांघ्रिपद्मो
ऽस्पृश्यः षष्ठेशादिभिः सत्सुमुदितमुपगाः सूरिमान्यो वदान्यः ।
शश्वच्छ्रीरामचन्द्रः सुमहितमहिमा साधुवेदैरगेपै—
र्निर्मृत्युः सर्वशक्तिर्विकल्पविजरो गीर्मनोभ्यामगम्यः" ॥४॥

इति ।

इत्यनुभवानन्दद्वारपीठनामकश्रीरामानन्दपीठसंस्थापकैर्जगद्-
गुरुश्रीमदनुभवानन्दाचार्यैर्विरचिते श्रौतार्थसंग्रह
ईश्वरार्थनिरूपणात्मकस्तृतीयः परिच्छेदः ॥३॥

समाप्तोऽयं ग्रन्थः ।



जगद्गुरुश्रीअनुभवानन्दाचार्यविरचिता
श्रीरामचन्द्रविंशतिः

रामं ब्रह्म तथानन्दभाष्यकारं जगद्गुरुम् ।
नत्वा करोमि भावार्थं श्रीरामचन्द्रविंशतिम् ॥

सोदरहृतराज्यश्रीः सुग्रीवः सह मन्त्रिभिः ।
यस्य चाश्रितवान् पादं रामचन्द्रं नमामि तम् ॥१॥

रावणन्यक्कृतो दान्तो विभीषणो भियाकुलः ।
स्वजनैर्यत्पदं चागाद् रामचन्द्रं नमामि तम् ॥२॥

रक्षोधिनाथसंक्षुब्धा सीता स्मृतवती च यम् ।
स्वमक्रवन्दितं नित्यं रामचन्द्रं नमामि तम् ॥३॥

चन्द्रांशुशोभिते रम्ये पुरा सरोवरोत्तमे ।
सस्मार यं गजो मुक्त्यै रामचन्द्रं नमामि तम् ॥४॥

पतिव्रता शिरोरत्नं गौतमधर्मचारिणी ।
अस्मरच्छापमुक्त्यै यं रामचन्द्रं नमामि तम् ॥५॥

कालिन्दीपुलिने रम्ये ध्रुवः सस्मार यं मुदा ।
लोकोत्तरपदप्राप्त्यै रामचन्द्रं नमामि तम् ॥६॥